## लण्। (मा.सू. ६)

ल इत्येकं [1]वर्णमुपदिश्य पूर्वांश्चान्ते णकारमितं करोति प्रत्याहारार्थम्। तस्य ग्रहणं भवति त्रिभिः। 'अणुदित्सवर्णस्य चाप्रत्ययः' (१.१.६९/१४) इत्यकारेण। '[2]इण्कोः' (८.३.५७/२११) इति इकारेण। 'इको यणचि' (६.१.७७/४७) इति यकारेण। इण्ग्रहणानि सर्वाणि परेण[3] णकारेण। अण्ग्रहणानि तु पूर्वेण[4], 'अणुदित्सवर्णस्य चाप्रत्ययः' (१.१.६९/१४) [5]इत्येतदेवैकं परेण (म.भा. १.३५)।

अथ किमर्थमजग्रहणमेवैतन्न[6] क्रियते? नैवं शक्यम्, अन्तःस्थानामपि हि[7] सवर्णानां ग्रहणमिष्यते। सयँय्यँन्ता, सवँव्वँत्सरः, यलँल्लँोकम्[8], [9]तलँल्लँोकम् इत्यत्रानुस्वारस्य अनुनासिके यथि[10] परसवर्णे कृते (८.४.५८/१२४) तस्य [11]यर्ग्रहणेन ग्रहणाद् द्विर्वचनं (८.४.४७/४८) यथा स्यादिति।

हकारादिष्वकार उच्चारणार्थः, [12]नानुबन्धः। लकारे [13]त्वनुनासिकः प्रतिज्ञायते, तेन 'उरण् रपरः' (१.१.५१/७०) इत्यत्र[14] र इति प्रत्याहारग्रहणाल्लपरत्वमपि भवति॥

## ञमङणनम्। (मा.सू. ७)

ञ म ङ ण न इत्येतान् वर्णानुपदिश्य पूर्वांश्चान्ते मकारमितं करोति प्रत्याहारार्थम्। तस्य ग्रहणं भवति त्रिभिः। 'पुमः खय्यम्परे' (८.३.६/१३९) इत्यकारेण। 'हलो यमां यमि[15]लोपः' (८.४.६४/६०) इति यकारेण। 'ङमो ह्रस्वादचि ङमुण् नित्यम्' (८.३.३२/१३४) इति ङकारेण। 'ञमन्ताड् डः' (उ. १.१११) इति ञकारेणापि ग्रहणमस्य [16]दृश्यते। [17]केचित्तु सर्वाण्येतानि प्रत्याहारग्रहणानि ञकारेण [18]भवन्तु इति [19]मकारमनुबन्धं प्रत्याचक्षते। तथा च[20] सति 'ङमो ह्रस्वादचि ङमुण् नित्यम्' (८.३.३२/१३४) इत्यत्रागमिनोः झभोरभावादागमाभावप्रतिपत्तौ[21] प्रतिपत्तिगौरवं[22] भवति॥

## झभञ्। (मा.सू. ८)

झ भ इत्येतौ वर्णावुपदिश्य पूर्वांश्चान्ते ञकारमितं करोति प्रत्याहारार्थम्। तस्य ग्रहणं भवत्येकेन। 'अतो दीर्घो यञि[23]' (७.३.१०१/२१७०) इति यकारेण॥

## घढधष्। (मा.सू. ९)

घ ढ ध इत्येतान् वर्णानुपदिश्य पूर्वांश्चान्ते षकारमितं करोति प्रत्याहारार्थम्। तस्य ग्रहणं भवति द्वाभ्याम्। 'एकाचो बशो भष् झषन्तस्य स्ध्वोः' (८.२.३७/३२६) [24]इति [25]भकारझकाराभ्याम्॥

---

1. एकवर्णं ड. 2. वाक्यमिदं नास्ति फ. 3. अनेन क. 4. णकारेण अ. फ. 5. इत्येनेन ड. फ,
इत्येकमनेन न्या. इत्येतदेकम्परेण प मं. 6. एतत् नास्ति ड. ह. 7. हि नास्ति ग. 8. पुल्लोकम् ब.
9. नास्ति फ. 10. परतः क, परसवर्णे क्रियमाणे ड. 11. यय्ग्रहणेन ग. 12. एतन्नास्ति ग. ह.
13. लकारेऽनुनासिकः इत्संज्ञः ड. फ. ह, नास्ति अ. 14. रेफेण र इति प्रत्याहारग्रहणं भवति ग,
रप्रत्याहारसंग्रहणम् ह. 15. लोप इति यकारेण नास्ति फ. 16. दृश्यते नास्ति ह. 17. केचिच्च सर्वाण्ये-
वैतानि ग. 18. भवन्ति ग. 19. मकारानुबन्धम् ह. 20. च नास्ति ह. 21. साध्यायाम् अ. ग. ड. फ. ह.
22. प्रतिपत्तेर्गौरवं क, °गौरवं स्यात् ड, प्रतिपत्तिः ह. 23. यन्ति फ. 24. झोः ह. 25. झकाराभ्याम् फ.